ब्रह्मानन्दं ततः स्फुटमिति" पञ्चदशी । आकाशे च । बहुविस्तारवति सिन्दुवारवृक्षे पु० । अवधिशून्ये, इयत्ताशून्ये वस्तुमात्रे, सकले च त्रि० "अनन्तरत्नप्रभवस्य यस्येति" कुमा० । जिनभेदे पु० ।

**अनन्तचतुर्द्दशी** स्त्री अनन्तस्य विष्णोराधानार्था चतुर्दशी । भाद्रपदशुक्लचतुर्दश्याम् ।

**अनन्तजित्** अनन्तानि भूतानि जितवान् जि—क्विप् । सर्वभूतजयिनि वासुदेवे । "सहस्रजिदनन्तजिदिति" विष्णुसह० । अनन्तान् चित्तदोषान् जयति । जिनदेवभेदे पु० ।

**अनन्ततीर्थकृत्** पु० अनन्तानि अनेकानि तीर्थानि शास्त्राणि करोति कृ—क्विप् । जैनभेदे । बहुतीर्थकर्त्तरि त्रि० ।

**अनन्ततृतीया** स्त्री "नभस्ये वाथ वैशाखे मार्गशीर्षेऽथवा पुनः । शुक्लपक्षतृतीयाया"मित्युपक्रम्य पद्मपुराणे तत्तदन्यतमतिथिषु व्रतविशेषमभिधाय "उक्तानन्ततृतीयैषा सुतानन्दफलप्रदा"इत्यनेन परिभाषितायां भाद्रमार्गवैशाखान्यतममासीयशुक्लतृतीयायाम् हेमा०व्रत० । [परमेश्वरे च ।

**अनन्तदृष्टि** पु० अनन्ता दृष्टयो नेत्राणि यस्य । इन्द्रे

**अनन्तदेव** पु० अनन्तो देव इव । शेषनागे, अनन्ते शेषनागे दीव्यति दिव—अच् । शेषशायिनि नारायणे ।

**अनन्तमूल** पु० अनन्तानि मूलान्यस्य । खनामख्याते मूलप्रधाने वृक्षभेदे ।

**अनन्तर** त्रि० नास्ति अन्तरं व्यवधानं यत्र । अव्यवहिते, व्यवधानञ्च द्विविधं दैशिकं कालिकञ्च । तत्र दैशिके"विषयानन्तरो राजा शत्रु"रित्यमरः । "एष ब्रह्मर्षिदेशो वै आर्य्यावर्त्तादनन्तर" इति मनुः । कालिके । "तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनमिति" कुमा० । "पितुरनन्तरमुत्तरकोशलामिति"रघुः । कालिकमपि द्विविधं पूर्ब्बापरकालकृतव्यवधानभेदात् उत्तरकालकृतस्योक्तोदारणे "अनन्तरोदीरितलक्ष्मभाजाविव्यत्र" पूर्ब्बकालावधिकृतम् । मध्यशून्ये, अवकाशशून्ये, अवधिशून्ये च । "तदेतद्ब्रह्मापूर्ब्बमनपरमनन्तरमवाह्यमिति" स यथा "सैन्धवघनोऽनन्तरोऽवाह्य" इति च वृ०उ० । अव्यवहितकाले । "पुराणपत्रापगमादनन्तरं—लतेव सन्नद्धमनोज्ञपल्लवा" इति रघुः । तत्र व्याप्तौ द्वितीया । तत्कालवृत्तिसंनहनक्रियाविशेषणतया क्लीवत्वादि । एवमन्यत्र एवञ्च एतस्य क्लीबोक्तिरर्वाचीनानां प्रामादिकी । एतेन अनन्तरस्याभावः अभावार्थेऽव्ययीभाव इत्याशयेन मान्तत्वकल्पनमपि तत्तदुदाहरणेषु अनन्वयादुपेक्ष्यमेव । उक्तोदाहरणेषु "अथास्य गोदानविधेरनन्तरमिति" "अनन्तरं भर्त्तुरुपस्थितोदयेति" च रघौ "योगाच्छान्तिरनन्तरमित्यादौ" च व्यवधानाभावार्थकत्वे समभिव्याहृतपदार्थानां हि नान्वयः तस्य देशकालादिबोधकत्वाभावेन व्याप्त्यर्थे द्वितीयाया अप्रसम्भवः । अतः बहुव्रीहिबलात् कालबोधकतया उक्तोदाहरणादिषु व्याप्त्यर्थे द्वितीयेति बोध्यम् । न०त० । अन्तरभिन्ने त्रि० तस्य अपुरि सर्व्वनामता । अनन्तरे भवः गहा०छ । अनन्तरीयः अविलम्बभवे त्रि० ।

**अनन्तरज** पु०स्त्री अनन्तरस्याः अनन्तरवर्णायाः जायते जन—ड पुंवद्भावः । क्रमोढाजे पुत्रादौ । अनन्तरं जातः । ज्येष्ठे कनिष्ठे च भ्रातरि । तथाभूतभगिन्यां स्त्री ।

**अनन्तरय** पु० अन्तरयति दूरीकरोति अन्तर+कृत्यर्थे णि भावे अच् अन्तरयः दूरीकरणम् अभावार्थे न०त० । अपरित्यागे । "यदुक्थो यज्ञक्रतोरनन्तरयायेति" ऋ० ४,१,६, "अनन्तरयाय अपरित्यागायेति" भा० ।

**अनन्तराय** त्रि० नास्ति अन्तरायः प्रतिबन्धको यस्य । निष्प्रतिबन्धके निर्विघ्ने "ताएतानवानन्तरायमन्वाहेति" वृ०उ० ।

**अनन्तराशि** पु० अनन्तस्य आकाशरूपशून्यस्य राशिः । बीजगणितोक्ते शून्यभागहाराद्यर्थं परिकल्पिते राशौ ।

**अनन्तरूप** पु० अनन्तानि रूपाण्यस्य । परमेश्वरे विष्णौ "अनन्तरूपोऽनन्तश्रीरिति" वि०स० । "इन्द्रोमायाभिः पुरुरूपईयत" इति श्रुत्या तस्य बहुरूपत्वप्रतिपादनात्तत्त्वम् ।

**अनन्तर्गर्भिन्** अन्तर्गर्भोऽस्य अस्त्यर्थे इनि न०त० । अन्तर्गर्भशून्ये पवित्रार्थे कुशे । "अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव चेति" आ०तत्त्वे छन्दो०प० । अनन्तर्गर्भिणमन्तर्गर्भशून्य"मिति रघुनन्दनः ।

**अनन्तविजय** पु० अनन्तान् विजयतेऽनेन ध्वनिद्वारा । युधिष्ठिरशङ्खे "अनन्तविजयं नाम कुन्तीपुत्रोयुधिष्ठिरः" इति गीता ।

**अनन्तवीर्य्य** पु० । ब० । जैनभेदे ।

**अनन्तव्रत** न० अनन्तस्य व्रतमुपासनार्थम् ६त० । भाद्रशुक्लचतुर्द्दश्यां कर्त्तव्ये खनामख्याते व्रते । "अनन्तव्रतमेतद्धि सर्वपापहरं शुभम्" इत्युपक्रम्य "तथा शुक्लचतुर्द्दश्यां मासि भाद्रपदे भवेदिति" भवि० पुरा० ।

**अनन्तशक्ति** पु० अनन्ता अपरिच्छेद्या शक्तिरस्य । परमेश्वरे "परास्य शक्तिर्विविधैव श्रूयते" इति श्रुतौ तस्य बहुशक्तिश्रवणात् तथात्वम् ।

**अनन्तशीर्षा** स्त्री अनन्तानि बहूनि शीर्षाणि यस्याः ।